COMPILED AND CIRCULATED BY PROF. ASIS BHATTACHARYA
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

লঘুসিদ্ধান্তকৌমুদী : বিভক্ত্যর্থাঃ প্রকরণম্

# चतुर्थी सम्प्रदाने २।३।१३

सम्प्रदाने कारके चतुर्थी विभक्तिर् भवति। उपध्यायाय गां ददाति। मानवकाय भिक्षां ददाति। देवदत्ताय रोचते। पुष्पेभ्यः स्पृहयति इत्यादि। चतुर्थीविधाने तादर्थ्ये उपसङ्ख्यानम्। यूपाय दारु। कुण्डलाय हिरण्यम्। रन्धनाय स्थाय स्थाली। अवहननायोलूखलम्। क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या। मूत्राय कल्पते यवागूः। उच्चाराय कल्पते यवागूः। क्लृपि इत्यर्थनिर्देशः। मूत्राय सम्पद्यते यवागूः। मूत्राय जायते यवगूः। उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या। वाताय कपिला विद्युदातपायातिलोहिनी। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्। हितयोगे चतुर्थी वक्तव्या। गोभ्यो हितम्। अरोचकिने हितम्।
विप्राय गां ददाति । अनभिहित इत्येव । दानीयो विप्रः ॥ । क्रियया यमभिप्रैति सोऽपि संप्रदानम् (वा) ॥ पत्ये शेते ॥ । यजेः कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा (वा) ॥ पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ॥
देवदत्ताय रोचते" इति। "रुच्यर्थानां प्रीयमाणः" १।४।३३ इति संप्रदानसंज्ञा। "पुष्पेभ्यः स्पृह्यति" इति। अत्र "स्पृहेरीप्सितः" १।४।३६ इत्यनेन। "तादर्थ्ये उपसंख्यानम्" इति। तच्छब्देन चतुर्थ्यन्तस्यार्थो निर्दिश्यते। तस्मा इदं तदर्थम्, तस्य भावस्तादर्थ्यम्। तत्र चतुर्थ्या उपसंख्यानम् = प्रतिपादनं कर्त्तव्यमित्यर्थः।

तत्रेदं प्रतिपादनम्-- "चतुर्थी" इति योगविभागः क्रियते, तेन तादर्थ्ये चतुर्थी भवतीति। अथवा "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः"२।१।३५ इति तादर्थ्ये चतुर्थ्याः समासवचनं ज्ञापकं भवति-- तादर्थ्येऽपि चतुर्थीति। "क्लृपि सम्पद्यमाने" इत्यादि। क्लृप्त्यर्थानां धानूनां प्रयोगे सम्पद्यमाने कर्त्तरि संपादनक्रियाविशिष्टे चतुर्थी वक्तव्या,

व्याख्येयेत्यर्थः। व्याख्यानं तु तमेव योगविभागमाश्रित्य। तथा "उत्पातेन ज्ञाप्यमाने" इत्यादावपि। "मूत्राय कल्पते यवागूः" इति। यवागूर्मूत्रविकाररूपेण भवतीत्यर्थः। विकाररूपापत्तौ चतुर्ती विज्ञेया। तेनेह न भवति-- देवदत्तस्य शालयः संपद्यन्त इति। यदा चाभेदविवक्षा तदा परत्वात् प्रथमैव भवति, न चतुर्थी-- मूत्रमिदं संपद्यते यवागूरिति, उच्चारोऽयं सम्पद्यते यवौदन इति। यदा तु "जनिकर्त्तृः प्रकृतिः" १।४।३० इति प्रकृतेरपादानात्वं विवक्ष्यते तदा यवाग्वा इति पञ्चम्येव स्यात्-- मूत्रं सम्पद्यते यवाग्वा इति। "वाताय कपिला विद्युत्" इति। अत्र कपिलाविद्युदुत्पातो वातस्य लक्षणम्। तेन ज्ञाप्यमाने वाते चतुर्थी भवति। "अरोचकिने" इति। "अत इनिठनौ" ५।२।११४ इतीनिः॥

विप्रमुद्दिश्य गां ददातीत्यर्थः। अनभिहित इत्येवेति। अनुवर्तत एवेत्यर्थः। दानीयो विप्र इति। दानोद्देश्य इत्यर्थः। "कृत्यल्युटो बहुल"मिति बहुलग्रहणात्संप्रदानेऽनीयर्। तेन कृता संप्रदानस्य विप्रस्याऽभिहितत्वान्न चतुर्थीति भावः। ननु दानक्रियाकर्मोद्देश्यस्यैव संप्रदानत्वे "पत्ये शेते" इत्यत्र अकर्मकशयनक्रियोद्देश्यस्य पत्युः कथं संप्रदानत्वमित्याशङ्कायां "क्रियाग्रहणमपि कर्तव्य"मिति वार्तिकं प्रवृत्तम्।तदेतदर्थतः सङ्गृहणाति-क्रियया यमिति। क्रियोद्देश्यमपि संप्रदानमिति यावत्। पत्ये शेते इति। पति मुद्दिश्य शेते इत्यर्थः॥

नन्वेवमपि ओदनं पचतीत्यादावपि संप्रदानत्वप्रसङ्गः। न च कर्मसंज्ञाविधिवैयर्थ्यं शङ्क्यम्, अत एव तत्र कर्मत्वसंप्रदानत्वयोर्विकल्पोपपत्तेरिति चेन्न,पत्ये शेते" इत्यकर्मकस्थले सावकाशायाः संप्रदानसंज्ञायाः सकर्मकस्थले कर्मसंज्ञया बाओधात्। तथाच अकर्मकक्रियोद्देश्यमपि संप्रदानमिति फलतीति भावः।कर्मणः करण संज्ञेत्यादि।

वार्तिकमिदम्। "एकस्मिन्वाक्ये कर्मणः संप्रदानस्य च समवाये सती"ति शेषः। यजधातुविषयमेवेदमित्यभिप्रेत्योदाहरति--पशुना रुद्रं यजत इति। अत्र यजधातुर्दानार्थक इत्यभिप्रेत्याह--ददातीत्यर्थ इति। इदं वार्तिकं छान्दसमेवेति कैयटः।

अन्वर्थसंज्ञाबलेनाह-दानस्येति। तेन ''अजां नयति ग्रामम्' ''हस्तं निदधाति वृक्षे' इत्यादौ नातिप्रसङ्ग इति भावः। दानं चापुनर्गहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। अत एव ''रजकस्य वस्त्रं ददाति' इत्यादौ न भवति ; तत्र हि ददातिर्भाक्तः। एतच्च वृत्तिकृन्मतम् ।भाष्यमते तु नान्वर्थतायामाग्रहः, ''खण्डिकोपाध्यायः शिष्याय चपेटां ददाति' इति प्रयोगात्। ''रजकस्य वस्त्रं ददाति' इति तु शेषत्वविवक्षायां बोध्यम्। न चैवम् ''अजां नयति ग्रामम्' इत्यत्रापि प्रसङ्गः ''यमभिप्रैति' इत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वं, कर्मणश्च शेषत्वं लभ्यते। ग्रामस्य अजां प्रति शेषित्वं नास्ति। दानीय इति। बाहुलकात् सम्प्रदाने अनीयर्।

## सम्बोधने च २।३।४७

प्रथमा स्यात्। हे राम। इति प्रथमा।

आभिमुख्यकरणं, तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोति इति वचनम् आरभ्यते। सम्बोधने च प्रथमा विभक्तिर् भवति। हे देवदत्त। हे देवदत्तौ। हे देवदत्ताः।

सम्बोधनम् = अभिमुखीकरणम्, तदधिके प्रातिपदिक्रथा" इति। अभिमुखीकरणस्य क्रियापरत्वात् प्रातिपदिकार्थे तस्यान्तर्भावो नास्ति, त्सयातदात्मकत्वात्, तस्मात तेनाधिकः प्रातिपदिकार्थो भवति। अथ कथमिह प्रथमा-हे-पचनम्, हे पचमानेति? कथञ्च न स्यात्? शतृशानज्भ्यामुक्तत्वात् सम्बोधनस्य। एतावपि "सम्बोधने च" इति सम्बोधन एव वक्ष्यते। मा भूदनेन, पूर्वसूत्रेण भविष्यति? सम्बोधनार्थस्येह

"कृत्तद्धितसमासाश्च" १।२।४६ इत्यनेन प्रातिपदिकार्थत्वात्। योगविभाग उत्तरार्थः॥संबोधनेऽधिके गम्येऽपि प्रथमा स्यादित्यर्थः। संबोधमभिमुखीकृत्य ज्ञापनम्। हे रामेति। "मां पाही"ति शेषः। इह रामं प्रति मद्रक्षणं ज्ञाप्यम्। नच "हे राजन्सार्वभौमो भव" इत्यत्र सार्वभौमशब्दादपि संबोधने प्रथमा स्यादिति वाच्यं, सम्यग्बोधनमेव हि संबोधनं, समित्युपसर्गबलात्। श्रोतरि विसिष्य राजत्वादिना ज्ञाते सत्येव तं प्रति कश्चिदर्थौ ज्ञापयितुं शक्यः, नान्यथा। ततश्च संबोधनविभक्तिरियमनुवाद्यविषयैवेति लभ्यते। न तु विधेयविषया। तथाच सार्वभौमत्वस्यविधेयस्यइदानीमसिद्धत्वेनअनुवाद्यत्वाऽभावान्नसार्वभौमशब्दात्संबोधनविभक्तिरिति मञ्जूषायां विस्तरः। [इति प्रथमा]।

গ্রন্থঋণ-

১. পাণিনীয় শব্দশাস্ত্র – সত্যনারায়ণ চক্রবর্তী
২. সিদ্ধান্তকৌমুদী – সচ্চিদানন্দ মুখোপাধ্যায়
৩.সিদ্ধান্তকৌমুদী – মদনমোহন ঝাঁ
৪. লঘু সিদ্ধান্তকৌমুদী-বিপদভঞ্জন পাল